# Skanda Stotram or Subrahmanya Stotram

# શ્રીસ્કન્દસ્તોત્રમ્ અથવા સુબ્રહ્મણ્યસ્તોત્રમ્

## Document Information

Text title : Skanda or Subrahmanya Stotram

File name : skandastotram.itx

Category : subrahmanya, aShottarashatanAma

Location : doc_subrahmanya

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail

Proofread by : Sivakumar Thyagarajan, PSA Easwaran

Description-comments : Portion is termed as skanda panchAshata nAma stotram. See 108 corresponding Namavali

Latest update : April 12, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# શ્રીસ્કન્દસ્તોત્રમ્ અથવા સુબ્રહ્મણ્યસ્તોત્રમ્

ૐ શ્રીગણેશાય નમઃ ।

યુધિષ્ઠિરૌવાચ-

ભગવન્શ્રોતુમિચ્છામિ નામાનિ ચ મહાત્મનઃ ।

ત્રિષુ લોકેષુ યાન્યસ્ય વિખ્યાતાનિ દ્વિજોત્તમ ॥ ૧॥

વૈશમ્પાયન ઉવાચ-

ઇત્યુક્તઃ પાણ્ડવેયેન મહાત્મા ઋષિસન્નિધૌ ।

ઉવાચ ભગવાંસ્તત્ર માર્કણ્ડેયો મહાતપાઃ ॥ ૨॥

આગ્નેયશ્ચૈવ સ્કન્દશ્ચ દીપ્તકીર્તિરનામયઃ ।

મયૂરકેતુર્ધર્માત્મા ભૂતેશો મહિષાર્દનઃ ॥ ૩॥

કામજિત્કામદઃ કાન્તઃ સત્યવાગ્ભુવનેશ્વરઃ ।

શિશુઃ શીઘ્રઃ શુચિશ્ચણ્ડો દીપ્તવર્ણઃ શુભાનનઃ ॥ ૪॥

અમોઘસ્ત્વનઘો રૌદ્રઃ પ્રિયશ્ચન્દ્રાનનસ્તથા ।

દીપ્તશક્તિઃ પ્રશાન્તાત્મા ભદ્રકુક્કુટમોહનઃ ॥ ૫॥

ષષ્ઠીપ્રિયશ્ચ ધર્માત્મા પવિત્રો માતૃવત્સલઃ ।

કન્યાભર્તા વિભક્તશ્ચ સ્વાહેયો રેવતીસુતઃ ॥ ૬॥

પ્રભુર્નેતા વિશાખશ્ચ નૈગમેયઃ સુદુશ્ચરઃ । var વિરાગશ્ચ

સુવ્રતો લલિતશ્ચૈવ બાલક્રીડનકપ્રિયઃ ॥ ૭॥

ખચારી બ્રહ્મચારી ચ શૂરઃ શરવણોદ્ભવઃ । var સુરઃ

વિશ્વામિત્રપ્રિયશ્ચૈવ દેવસેનાપ્રિયસ્તથા ।

વાસુદેવપ્રિયશ્ચૈવ પ્રિયઃ પ્રિયકૃદેવતુ ॥ ૮॥

નામાન્યેતાનિ દિવ્યાનિ કાર્તિકેયસ્ય યઃ પઠેત્ ।

સ્વર્ગં કીર્તિં ધનં ચૈવ સ લભેન્નાત્રસંશયઃ ॥ ૯॥

માર્કણ્ડેય ઉવાચ -
સ્તોષ્યામિ દેવૈરૃષિભિશ્ચ જુષ્ટં શક્ત્યા ગુહં નામભિરપ્રમેયમ્ ।
ષડાનનં શક્તિધરં સુવીર નિબોધ ચૈતાનિ કુરુપ્રવીર ॥ ૧૦॥

બ્રહ્મણ્યો વૈ બ્રહ્મજો બ્રહ્મવિચ્ચ બ્રહ્મેશયો બ્રહ્મવતાં વરિષ્ઠઃ ।
બ્રહ્મપ્રિયઃ બ્રાહ્મણસર્વમન્ત્રી ત્વં બ્રહ્મણાં બ્રાહ્મણાનાં ચ નેતા ॥ ૧૧॥

સ્વાહા સ્વધા ત્વં પરમં પવિત્રં મન્ત્રસ્તુતસ્ત્વં પ્રથિતઃ ષડર્ચિઃ ।
સંવત્સરસ્ત્વમૃતવશ્ચ ષડ્વૈ માસાર્ધમાસાશ્ચ દિનં દિશશ્ચ ॥ ૧૨॥

ત્વં પુષ્કરાક્ષસ્ત્વરવિન્દવક્ત્રઃ સહસ્રચક્ષુરસિ સહસ્રબાહુઃ ।
ત્વં લોકપાલઃ પરમં હવિશ્ચ ત્વં ભાવનઃ સર્વસુરાસુરાણામ્ ॥ ૧૩॥

ત્વમેવ સેનાધિપતિઃ પ્રચણ્ડઃ પ્રભુર્વિભુશ્ચાપ્યથ શક્રજેતા ।
સહસ્રપાત્ત્વં ધરણી ત્વમેવ સહસ્રતુષ્ટિશ્ચ સહસ્રભુક્ચ ॥ ૧૪॥

સહસ્રશીર્ષ્ણસ્ત્વમનન્તરૂપઃ સહસ્રપાત્ત્વં દશશક્તિધારી ।
ગઙ્ગાસુતસ્ત્વં સ્વમતેન દેવ સ્વાહામહીકૃત્તિકાનાં તથૈવ ॥ ૧૫॥

ત્વં ક્રીડસે ષણ્મુખ કુક્કુટેન યથેષ્ટનાનાવિધકામરૂપી ।
દીક્ષાઽસિ સોમો મરુતઃ સદૈવ ધર્મોઽસિ વાયુરચલેન્દ્ર ઇન્દ્રઃ ॥ ૧૬॥

સનાતનાનામપિ શાશ્વતસ્ત્વં પ્રભુઃ પ્રભૂણામપિ ચોગ્રધન્વા ।
ઋતસ્ય કર્તા દિતિજાન્તકસ્ત્વં જેતા રિપૂણાં પ્રવરઃ સુરાણામ્ ॥ ૧૭॥

સૂક્ષ્મં તપસ્તત્પરમં ત્વમેવ પરાવરજ્ઞોઽસિ પરાવરસ્ત્વમ્ ।
ધર્મસ્ય કામસ્ય પરસ્ય ચૈવ ત્વત્તેજસા કૃત્સ્નમિદં મહાત્મન્ ॥ ૧૮॥

વ્યાપ્તં જગત્સર્વસુરપ્રવીર શક્ત્યા મયા સંસ્તુતલોકનાથ ।
નમોઽસ્તુ તે દ્વાદશનેત્રબાહો અતઃપરં વેદ્મિ ગતિં ન તેઽહમ્ ॥ ૧૯॥

સ્કન્દસ્ય ય ઇદં વિપ્રઃ પઠેજ્જન્મ સમાહિતઃ ।
શ્રાવયેદ્બ્રાહ્મણેભ્યો યઃ શ઼ૃણુયાદ્વા દ્વિજેરિતમ્ ॥ ૨૦॥

ધનમાયુર્યશોદીપ્તં પુત્રાન્ શત્રુજયં તથા ।
સ પુષ્ટિતુષ્ટી સંપ્રાપ્ય સ્કન્દસાલોક્યમાપ્નુયાત્ ॥ ૨૧॥

॥ ઇતિ શ્રીમન્મહાભારતવનપર્વાન્તર્ગતં સ્કન્દ (સુબ્રહ્મણ્ય)
સ્તોત્રં સમ્પૂર્ણમ્ ॥

સ્કન્દાષ્ટોત્તરશતનામસ્તોત્રમ્

The first half is also given as Skanda Panchashata Nama Stotram
શ્રીસ્કન્દપઞ્ચાશતનામસ્તોત્રમ્ and corresonding
nAmAvalI

Encoded by Sivakumar Thyagarajan Iyer
Proofread by Sivakumar Thyagarajan Iyer, PSA Easwaran

---

*Skanda Stotram or Subrahmanya Stotram*
pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*